# Shri Kamakshi Stuti

# શ્રીકામાક્ષીસ્તુતિઃ

## Document Information

Text title : Shri Kamakshi Stuti 08 10

File name : kAmAkShIstutiH.itx

Category : devii, devI, stuti

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-10

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

# શ્રીકામાક્ષીસ્તુતિઃ

વન્દે કામાક્ષ્યહં ત્વાં વરતનુલતિકાં વિશ્વરક્ષૈકદીક્ષાં
    વિષ્વગ્વિશ્વમ્ભરાયામુપગતવસતિં વિશ્રુતામિષ્ટદાત્રીમ્ ।
વામોરૂમાશ્રિતાર્તિપ્રશમનનિપુણાં વીર્યશૌર્યાદ્યુપેતાં
    વન્દારુસ્વસ્વર્દ્રુમિન્દ્રાદ્યુપગતવિટપાં વિશ્વલોકાલવાલામ્ ॥ ૧॥

ચાપલ્યાદિયમભ્રગા તટિદહો કિઞ્ચેત્સદા સર્વગા-
    હ્યજ્ઞાનાખ્યમુદગ્રમન્ધતમસં નિર્ણુદ્ય નિસ્તન્દ્રિતા ।
સર્વાર્થાવલિદર્શિકા ચ જલદજ્યોતિર્ન ચૈષા તથા
    યામેવં વિવદન્તિ વીક્ષ્ય વિબુધાઃ કામાક્ષિ નઃ પાહિ સા ॥ ૨॥

દોષોત્સૃષ્ટવપુઃ કલાં ચ સકલાં બિભ્રત્યલં સન્તતં
    દૂરત્યક્તકલઙ્કિકા જલજનુર્ગન્ધસ્ય દૂરસ્થિતા ।
જ્યોત્સ્નાતો હ્યુપરાગબન્ધરહિતા નિત્યં તમોઘ્ના સ્થિરા
    કામાક્ષીતિ સુચન્દ્રિકાતિશયતા સા પાતુ નઃ સર્વદા ॥ ૩॥

દિશ્યાદ્દેવિ સદા ત્વદઙ્ઘ્રિકમલદ્વન્દ્વં શ્રિતાલિષ્વલં
    વૃત્તિં તત્સ્વયમાદધચ્ચ વિમુખં દોષાકરાડમ્બરે ।
સૂર્યાદર્શહસન્મુખં શ્રુતિપથસ્યાત્યન્તભૂષાયિતં
    નેત્રાનન્દવિધાયિ પઙ્કમધરીકૃત્યોજ્જ્વલં સદ્વૃતમ્ ॥ ૪॥

કામાક્ષીપદપદ્મયુગ્મમનઘં કુર્યાન્મદીયે મનઃ-
    કાસારે વસતિં સદાપિ સુમનસ્સન્દોહસંરાજિતે ।
સુજ્ઞાનામૃતપૂરિતે કલુષતાહીને ચ પદ્માલયે
    નિત્યં સત્કુમુદાશ્રિતે નિજવસત્યાત્તપ્રભાવે સદા ॥ ૫॥

કામક્ષીપદપદ્મયુગ્મનખરાઃ સમ્યક્કલાસંયુતાઃ
    નિત્યં સદ્ગુણસંશ્રિતાઃ કુવલયામોદોદ્ભવાધાયકાઃ ।
ઉત્કોચં દધતશ્ચ પઙ્કજનુષાં સંરોચકાઃ સ્થાનતઃ
    શ્રેષ્ઠાદિન્દુનિરાસકારિવિભવા રક્ષન્તુ નઃ સર્વદા ॥ ૬॥

કામાક્ષીચરણારવિન્દયુગલીગુલ્ફદ્વયં રક્ષતા-
દસ્માન્ સન્તતમાશ્રિતાર્તિશમનં દોષૌઘવિધ્વંસનમ્ ।
તેજઃપૂરનિધાનમઙ્ઘ્રિવલયાદ્યાકલ્પસઙ્ઘટ્ટન-
પ્રોદ્યદ્ધ્વાનમિષેણ ચ પ્રતિશૃણન્નમ્રાલિરક્ષામિવ ॥ ૭॥

જઙ્ઘે દ્વે ભવતાં જગત્ત્રયનુતે નિત્યં ત્વદીયે મન-
સ્સન્તોષાય મમામિતોર્જિતયશઃસમ્પત્તયે ચ સ્વયમ્ ।
સામ્યોલઙ્ઘનજાઙ્ઘિકે સુવપુષા વૃત્તે પ્રભાસંયુતે
હે કામાક્ષિ સમુન્નતે ત્રિભુવનીસઙ્ક્રાન્તિયોગ્યે વરે ॥ ૮॥

કામાક્ષ્યન્વહમેધમાનમવતાજ્જાનુદ્વયં માં તવ
પ્રખ્યાતારિપરાભવૈકનિરતિ પ્રદ્યોતનાભં દ્યુતેઃ ।
સમ્યગ્વૃત્તમતીવ સુન્દરમિદં સમ્પન્નિદાનં સતાં
લોકપ્રાભવશંસિ સર્વશુભદં જઙ્ઘાદ્વયોત્તમ્ભનમ્ ॥ ૯॥

ઊરૂ તે ભવતાં મુદે મમ સદા કામાક્ષિ ભો દેવતે
રમ્ભાટોપવિમર્દનૈકનિપુણે નીલોત્પલાભે શુભે ।
શુણ્ડાદણ્ડનિભે ત્રિલોકવિજયસ્તમ્ભૌ શુચિત્વાર્જવ-
શ્રીયુક્તે ચ નિતમ્બભારભરણૈકાગ્રપ્રયત્ને સદા ॥ ૧૦॥

કામાક્ષ્યન્વહમિન્ધતાં નિગનિગપ્રદ્યોતમાનં પરં
શ્રીમદ્દર્પણદર્પહારિ જઘનદ્વન્દ્વં મહત્તાવકમ ।
યત્રેયં પ્રતિબિમ્બિતા ત્રિજગતી સૃષ્ટેવ ભૂયસ્ત્વયા
લીલાર્થં પ્રતિભાતિ સાગરવનગ્રાવાદિકાર્ધાવૃતા ॥ ૧૧॥

બોભૂતાં યશસે મમામ્બ રુચિરૌ ભૂલોકસઞ્ચારતઃ
શ્રાન્તૌ સ્થૂલતરૌ તવાતિમૃદુલૌ સ્નિગ્ધૌ નિતમ્બૌ શુભૌ ।
ગાઙ્ગેયોન્નતસૈકતસ્થલકચગ્રાહિસ્વરૂપૌ ગુણ-
શ્લાઘ્યૌ ગૌરવશોભિનૌ સુવિપુલૌ કામાક્ષિ ભો દેવતે ॥ ૧૨॥

કામાક્ષ્યઘ સુરક્ષતાત્ કટિતટી તાવકયતીવોજ્જ્વલ-
દ્રત્નાલઙ્કૃતહાટકાઢ્યરશનાસમ્બદ્ધઘણ્ટારવા ।
તત્રત્યેન્દુમણીન્દ્રનીલગરુડપ્રખ્યોપલજ્યોતિષા
વ્યાપ્તા વાસવકાર્મુકદ્યુતિખનીવાભાતિ યા સર્વદા ॥ ૧૩॥

વસ્તિઃ સ્વસ્તિગતા તવાતિરુચિરા કામાક્ષિ ભો દેવતે

સન્તોષં વિદધાતુ સન્તતમસૌ પીતામ્બરાષ્ટિતા ।
તત્રાપિ સ્વકયા શ્રિયા તત ઇતઃ પ્રદ્યોતયન્તી દિશઃ
કાન્તેન્દ્રોપલકાન્તિપુઞ્જકણિકેવાભાતિ યા સૌષ્ઠવાત્ ॥ ૧૪॥

યન્નાભીસરસી ભવાભિધમરુક્ષોણીનિવિષ્ટોદ્ભવ-
ત્તૃષ્ણાર્તાખિલદેહિનામનુકલં સુજ્ઞાનતોયં વરમ્ ।
દત્વા દેવિ સુગન્ધિ સદ્ગણસદાસેવ્યં પ્રણુદ્ય શ્રમં
સન્તોષાય ચ બોભવીતુ મહિતે કામાક્ષિ ભો દેવતે ॥ ૧૫॥

યન્મધ્યં તવ દેવિ સૂક્ષ્મમતુલં લાવણ્યમૂલં નભઃ-
પ્રખ્યં દૃષ્ટનિરીક્ષણપ્રસરણશ્રાન્ત્યાપનુત્ત્યા ઇવ ।
જાતં લોચનદૂરગં તદવતાત્ કામાક્ષિ સિંહાન્તર-
સ્વૈરાટોપનિરાસકારિ વિમલજ્યોતિર્મયં પ્રત્યહમ્ ॥ ૧૬॥

ધૃત્યૈ તે કુચયોર્વલિત્રયમિષાત્ સૌવર્ણદામત્રયી-
બદ્ધં મધ્યમનુત્તમં સુદૃઢયોર્ગુર્વોર્યયોર્દૈવતે ।
સૌવર્ણૌ કલશાવિવાદ્ય ચ પયઃપૂરીકૃતૌ સત્કૃતૌ
તૌ કામાક્ષિ મુદં સદા વિતનુતાં ભારં પરાકૃત્ય નઃ ॥ ૧૭॥

પાણી તે શરણાગતાભિલષિતશ્રેયઃપ્રદાનોદ્યતૌ
સૌભાગ્યાધિકશંસિશાસ્ત્રવિહરદ્રેખાઙ્કિતૌ શોભનૌ ।
સ્વર્લોકદ્રુમપઞ્ચકં વિતરણે તત્તતૃષાં તસ્ય ત-
ત્પાત્રાલાભવિશઙ્કયાઙ્ગુલિમિષાન્મન્યે વિભાત્યત્ર હિ ॥ ૧૮॥

દત્તાં દેવિ કરૌ તવાતિમૃદુલૌ કામાક્ષિ સમ્પત્કરૌ
સદ્રત્નાઞ્ચિતકઙ્કણાદિભિરલં સૌવર્ણકૈર્ભૂષિતૌ ।
નિત્યં સમ્પદમત્ર મે ભવભયપ્રધ્વંસનૈકોત્સુકૌ
સંરક્તૌ ચ રસાલપલ્લવતિરસ્કારં ગતૌ સુન્દરૌ ॥ ૧૯॥

ભૂયાસ્તાં ભુજગાધિપાવિવ મુદે બાહૂ સદા માંસલૌ
કામાક્ષ્યુજ્જ્વલનૂત્નરત્નખચિતસ્વર્ણાઙ્ગદાલઙ્કૃતૌ ।
ભાવત્કૌ મમ દેવિ સુન્દરતરૌ દૂરીકૃતદ્વેષણ-
પ્રોદ્યદ્બાહુબલૌ જગત્ત્રયનુતૌ નમ્રાલિરક્ષાપરૌ ॥ ૨૦॥

સ્કન્ધૌ દેવિ તવાપરૌ સુરતરુસ્કન્ધાવિવોજ્જૃમ્ભિતા-
વસ્માન્નિત્યમતન્દ્રિતૌ સમવતાં કામાક્ષિ દત્વા ધનમ્ ।
કણ્ઠાસક્તસમસ્તભૂષણરુચિવ્યાપ્તૌ સ્વયં ભાસ્વરૌ

લોકાઘૌઘસમસ્તનાશનચણાવુત્તમ્ભિતાવુદ્દ્યુતી ॥ ૨૧॥

ગ્રીવા કમ્બુસમાનસંસ્થિતિરસૌ કાન્ત્યેન્દ્રનીલોપમા
પાયાન્મામનિશં પુરાણવિનુતે કામાક્ષિ ભો તાવકી ।
નાનારત્નવિભૂષણૈઃ સુરુચિરા સૌવર્ણકૈર્મૌક્તિક-
શ્રેષ્ટોદ્રુમ્ભિતમાલયા ચ વિમલા લાવણ્યપાથોનિધિઃ ॥ ૨૨॥

દેવિ ત્વદ્વદનામ્બુજં વિતનુતાચ્છ્રેયઃ પરં શાશ્વતમ્ ।
કામાક્ષ્યદ્ય મમામ્બ પઙ્કજમિદં યત્કાન્તિલાભે (ચ્છયા) ।
તોયે નૂનમહર્નિશં ચ વિમલે મઙ્ક્ત્વા તપસ્યત્યલં
તત્સૌન્દર્યનિધાનમગ્ર્યસુષમં કાન્તાલકાલઙ્કૃતમ્ ॥ ૨૩॥

નેત્રે તે કરુણાકટાક્ષવિશિખૈઃ કામાદિનિત્યદ્વિષો
બાહ્યામપ્યરિસંહતિં મમ પરાકૃત્યાવતાં નિત્યશઃ ।
હે કામાક્ષિ વિશાલતામુપગતે હ્યાકર્ણ મિષ્ટાવહે
સાતત્યેન ફલાર્થિનાં નિજગતેઃ સમ્ફુલકં જાયતે ॥ ૨૪॥

ભ્રૂયુગ્મં તવ દેવિ ચાપલતિકાહઙ્કારનિર્વાપણં
કાન્તં મુગ્ધવિકાસચેષ્ટિતમહાભાગ્યાદિસંસૂચકમ્ ।
કામાક્ષ્યન્વહમેધતાં કૃતપરિસ્પન્દં રિપૂદ્વાસને
દીનાનિઙ્ગિતચેષ્ટિતૈરવદિદં સુવ્યક્તરૂપં પરમ્ ॥ ૨૫॥

નાનાસૂનવિતાનસૌરભપરિગ્રાહૈકલોલાલયઃ
કિં માં પ્રત્યભિયન્તિ નેતિ કુપિતં તમ્વા તપો દુષ્કરમ્ ।
નાસીભૂય તવાતિસૌરભવહં ભૂત્વાભિતઃ પ્રેક્ષણ-
વ્યાજેન પ્રિયકપ્રસૂનમલિભિઃ કામાક્ષિ ભાત્યાશ્રિતમ્ ॥ ૨૬॥

વક્ત્રં પાતુ તવાતિસુન્દરમિદં કામાક્ષિ નઃ સર્વદા
શ્રીમત્કુન્દસુકુડ્મલાગ્રદશનશ્રેણીપ્રભાશોભિતમ્ ।
પુષ્યદ્બિમ્બફલારુણાધરપુટં સદ્વીટિકારઞ્જિતં
સૌભાગ્યાતિશયાભિધાયિહસિતશ્રીશોભિતાશાગણમ્ ॥ ૨૭॥

સન્તોષં શ્રુતિશષ્કુલીયુગમિદં સદ્રત્નશોભાસ્ફુર-
ત્તાટઙ્કાઢ્યયુગેન ભાસ્વરરુચા સમ્ભૂષિતં તાવકમ્ ।
કામાક્ષ્યદ્ય ચરીકરીતુ વિમલજ્યોતિર્મમાનારતં
સ્વાભ્યાશસ્થિતગણ્ડભાગફલકં સરાજયજ્જ્યોતિષા ॥ ૨૮॥

શીર્ષં તે શિરસા નમામિ સતતં કામાક્ષ્યહં સુન્દરં
    સૂક્ષ્મં તન્મધુપાલિનીલકુટિલશ્રીકુન્તલાલઙ્કૃતમ્ ।
સીમન્તં સુવિભજ્ય તત્ર વિપુલશ્રીમન્મણીન્દ્રાનિત
    સ્વર્ણાલઙ્કરણપ્રભાસુરુચિરં શીર્ષણ્યભૂષાયિતમ્ ॥ ૨૯॥

કામાક્ષીશ્વરિ કોટિસૂર્યનિનસદ્વજ્રાદિરત્નાઞ્ચિત-
    શ્રીમન્મુગ્ધકિરીટભૃદ્વિતરતાદ્ધન્યં શિરસ્તાવકમ્ ।
સમ્પત્તિં નિતરાં મમામ્બ મનુજાપ્રાપ્યામિહાનારતં
    લોકેઽમુત્ર ભવાભિધં વ તિમિરં લૂત્વા સદાલિશ્રિતમ્ ॥ ૩૦॥

કામાક્ષીસ્તુતિમન્વહં ભુવિ નરાઃ શુદ્ધાશ્ચ યે ભક્તિતઃ
    શ઼ૃણ્વન્ત્યત્ર પઠન્તિ વા સ્થિરધિયઃ પણ્યામિમામર્થિનઃ ।
દીર્ઘાયુર્ધનધાન્યસમ્પદમમી વિન્દન્તિ વાણીં યશઃ
    સૌભાગ્યં સુતપૌત્રજાતમધિકખ્યાતિં મુદં સર્વદા ॥ ૩૧॥

કૌણ્ડિન્યાન્વયસમ્ભૂતરામચન્દ્રાર્યસૂરિણા ।
નિર્મિતા ભાતિ કામાક્ષીસ્તુતિરેષા સતાં મતા ॥ ૩૨॥

ઇતિ શ્રીકામાક્ષીસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by Rajesh Thyagarajan

*Shri Kamakshi Stuti*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*